श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ सप्तपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तपञ्चाशः सर्गः ॥

## श्रीरामस्य मृगं हत्वा निवर्तनं मार्गेऽपशकुनं दृष्ट्वा तस्य चिन्ता तत्र मिलितं लक्ष्मणमुपालभ्य सीताविषयकसङ्कटस्य तेनाशङ्कनम्

राक्षसं मृगरूपेण चरन्तं कामरूपिणम्।
निहत्य रामो मारीचं तूर्णं पथि न्यवर्तत॥ **3.57.1** ॥

तस्य सन्त्वरमाणस्य द्रष्टुकामस्य मैथिलीम्।
क्रूरस्वनोऽथ गोमायुर्विननादास्य पृष्ठतः॥ **3.57.2** ॥

स तस्य स्वरमाज्ञाय दारुणं रोमहर्षणम्।
चिन्तयामास गोमायोः स्वरेण परिशङ्कितः॥ **3.57.3** ॥

अशुभं बत मन्येऽहं गोमायुर्वाश्यते यथा।
स्वस्ति स्यादपि वैदेह्या राक्षसैर्भक्षणं विना॥ **3.57.4** ॥

मारीचेन तु विज्ञाय स्वरमालक्ष्य मामकम्।
विक्रुष्टं मृगरूपेण लक्ष्मणः शृणुयाद् यदि॥ **3.57.5** ॥

स सौमित्रिः स्वरं श्रुत्वा तां च हित्वाथ मैथिलीम्।
तयैव प्रहितः क्षिप्रं मत्सकाशमिहैष्यति॥ **3.57.6** ॥

राक्षसैः सहितैर्नूनं सीताया ईप्सितो वधः।
काञ्चनश्च मृगो भूत्वा व्यपनीयाश्रमात्तु माम्॥ **3.57.7** ॥

दूरं नीत्वाथ मारीचो राक्षसोऽभूच्छराहतः।
हा लक्ष्मण हतोऽस्मीति यद्वाक्यं व्याजहार ह॥ **3.57.8** ॥

अपि स्वस्ति भवेद् द्वाभ्यां रहिताभ्यां मया वने।
जनस्थाननिमित्तं हि कृतवैरोऽस्मि राक्षसैः॥ **3.57.9** ॥

निमित्तानि च घोराणि दृश्यन्तेऽद्य बहूनि च।
इत्येवं चिन्तयन् रामः श्रुत्वा गोमायुनिःस्वनम्॥ **3.57.10** ॥

निवर्तमानस्त्वरितो जगामाश्रममात्मवान्।
आत्मनश्चापनयनं मृगरूपेण रक्षसा॥ **3.57.11** ॥

आजगाम जनस्थानं राघवः परिशङ्कितः।
तं दीनमानसं दीनमासेदुर्मृगपक्षिणः॥ **3.57.12** ॥

सव्यं कृत्वा महात्मानं घोरांश्च ससृजुः स्वरान्।
तानि दृष्ट्वा निमित्तानि महाघोराणि राघवः।
न्यवर्तताथ त्वरितो जवेनाश्रममात्मनः॥ **3.57.13** ॥

ततो लक्ष्मणमायान्तं ददर्श विगतप्रभम्।
ततोऽविदूरे रामेण समीयाय स लक्ष्मणः॥ **3.57.14** ॥

विषण्णः सन् विषण्णेन दुःखितो दुःखभागिना।
स जगर्हेऽथ तं भ्राता दृष्ट्वा लक्ष्मणमागतम्॥ **3.57.15** ॥

विहाय सीतां विजने वने राक्षससेविते।
गृहीत्वा च करं सव्यं लक्ष्मणं रघुनन्दनः॥ **3.57.16** ॥

उवाच मधुरोदर्कमिदं परुषमार्तवत्।
अहो लक्ष्मण गर्ह्यं ते कृतं यत् त्वं विहाय ताम्॥ **3.57.17** ॥

सीतामिहागतः सौम्य कच्चित् स्वस्ति भवेदिति।
न मेऽस्ति संशयो वीर सर्वथा जनकात्मजा॥ **3.57.18** ॥

विनष्टा भक्षिता वापि राक्षसैर्वनचारिभिः।
अशुभान्येव भूयिष्ठं यथा प्रादुर्भवन्ति मे॥ **3.57.19** ॥

अपि लक्ष्मण सीतायाः सामग्र्यं प्राप्नुयामहे।
जीवन्त्याः पुरुषव्याघ्र सुताया जनकस्य वै॥ **3.57.20** ॥

यथा वै मृगसङ्घाश्च गोमायुश्चैव भैरवम्।
वाश्यन्ते शकुनाश्चापि प्रदीप्तामभितो दिशम्।
अपि स्वस्ति भवेत् तस्या राजपुत्र्या महाबल॥ **3.57.21** ॥

इदं हि रक्षो मृगसन्निकाशं
प्रलोभ्य मां दूरमनुप्रयातम्।
हतं कथञ्चिन्महता श्रमेण
स राक्षसोऽभून्म्रियमाण एव॥ **3.57.22** ॥

मनश्च मे दीनमिहाप्रहृष्टं
चक्षुश्च सव्यं कुरुते विकारम्।
असंशयं लक्ष्मण नास्ति सीता
हृता मृता वा पथि वर्तते वा॥ **3.57.23** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे सप्तपञ्चाशः सर्गः॥